# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – नवेम्बर-दिसम्बर, २०१६

कक्षा – शास्त्रितृतीयवर्षम् (SEM-5) **प्रश्नपत्रम् – ५** गुणाः - ७०

विषयः – फलितज्योतिषम् **कोड – C.C.3.5.9** समयः –११:००-०२:००

दिनाङ्कः – २९-११-२०१६ सन्दर्भग्रन्थः –पञ्चस्वराः, लघुजातकम्

---

**प्रथमान्वितिः (Unit-1)**

**प्रश्नः – १ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।** ०८

(१) चतुर्विंशति वर्षाणि यावद्गच्छन्ति जन्मत:।
तावद्रिष्टं च निश्चित्य अयुर्दायं न चिन्तयेत्॥

(२) कुज शुक्र बुधेन्द्वर्क सौम्य शुक्रावनीभुवाम्।
जीवार्कि भानुजेज्यानां क्षेत्राणि स्युरजादय॥

(३) तुल्यदृष्टिद्वयोर्वापि तुल्य योगो भवेद्यदि।
तदा मासं विधातव्यं ग्रहाणां च बलाबलम्॥

**प्रश्नः – २ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** ०८

(१) त्रिपताकीचक्रस्य निर्माणविधि: (२) ग्रहाणां उच्चनीचादिराशिविचार:

**प्रश्नः – ३ निम्नलिखितेषु टिप्प्पणीद्वयं लिखत।** ०४

(१) ग्रन्थप्रयोजनम् (३) राशिषु अङ्कस्थापनम्

(२) ग्रहाणां सौम्यक्रुरादिलक्षणम् (४) ग्रहबल निरुपणम्

**प्रश्नः – ४ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत।** ०५

(१) अस्य ग्रन्थस्य मुख्य: प्रतिपाद्यविषय: क:? (५) कति वर्षपर्यन्तं अरिष्टं चिन्तयेत्?

(२) त्रिपताकिचक्रे मूलरेखा: कति भवन्ति ? (६) मीनराशे: स्वामीग्रह: क: ?

(३) शुक्र: कति दिवसपर्यन्तं एकस्मिन् राशौ तिष्ठति ? (७) आर: इति कस्य संज्ञा?

(४) त्रिपताकीचक्रे कर्कराशि: जन्मलग्नोऽस्ति चेत् कस्मिन् राशौ वेध भवति ?

**द्वितीयान्वितिः (Unit-2)**

**प्रश्नः – ५ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।।** ०८

(१) गणयित्वा निर्णयं वर्षे वर्षप्रभाग कल्पना।
पञ्चभिश्च हते शेषे नन्दाद्या मृत्यु कारणम्॥

(२) रविमन्दकुजे वर्षे राहौ वा द्वित्रि संस्थिते।
सप्त शून्यानि चेत्तत्र मृत्युर्भवति नान्यथा॥

(३) कर्मस्थाने स्थित: सौरि: शत्रुस्थाने कलानिधि:।
क्षितिज: सप्तमस्थाने समात्रा म्रियते शिशु:॥

**प्रश्नः – ६ अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** ०८

(१) स्वरानुसारेण आयुर्विचार: (२) अरिष्टयोगा:

**प्रश्नः – ७ निम्नलिखितेषु टिप्पणीद्वयं लिखत।** ०४

(१) तिथ्यादिस्थापनकथनम्  (३) पुंस्त्रीजन्मज्ञानम्

(२) द्विमासे मरणयोग:  (४) सर्पदंशयोग:

**प्रश्नः – ८ अधोनिर्दिष्टेषु पञ्चानाम् अतिलघूत्तरं यच्छत** ०५

(१) पताकीचक्रा: कतिधा: ?  (५) सौरि: क:?

(२) बुधवत्सरस्य किं फलम् ?  (६) चन्द्रस्य अरि: क:?

(३) पापा: अष्टमस्था: एवं सौम्या: द्वादशस्थस्य किं फलम् ?  (७) सूर्यस्य होरा कदा भवति ?

(४) पापग्रहस्य महादशायां एवं तस्यैव अन्तर्दशायां मित्रयोगे किं फलम्?

**तृतीयान्विति: (Unit-3)**

**प्रश्नः – ९ अधोलिखितेषु कयोश्चिद् द्वयोः व्याख्यां कुरुत।।** ०८

(१) अरुणसितहरितपाटलपांडुविचित्रा: सितेतरपिंशगौ।
पिङ्गलकर्बुरबभ्रुकमलिना रुचयो यथासंख्यम्।।

(२) त्रिषडेकादशदशमान्युपचयभवनान्यतोऽन्यथानि।
वर्गोत्तमा नवांशाश्चरादिषु प्रथममध्यान्त्या:।।

(३) चतुरस्त्रे सप्तमग: पापान्तस्थ: शशी मरणदाता।
उदयगतो वा चन्द्र: सप्तमराशिस्थितै:।

**प्रश्नः – १० अधोलिखितयोः प्रश्नयोः कस्यचिदेकस्योपरि निबन्धं निबन्धयत।** ०८

(१) ग्रहाणामायुसाधनम्  (२) अरिष्टयोगा:

**प्रश्नः – ११ निम्नलिखितयोः कस्यचिदेकस्य उपरि टिप्पणीं लिखत** ०२

(१) चन्द्रस्वरूपम्  (२) ग्रन्थप्रयोजनम्

**प्रश्नः – १२ अधोलिखितेषु कयोश्चिद् द्वयोः अतिलघूत्तरं लिखत।** ०२

(१) लघुजातकग्रन्थस्य लेखक: क: ?  (३) चन्द्रस्य होरा कदा भवति ?

(२) मिथुनराशे: वर्ण: क: ?  (४) चतुष्पादराशय: के ?